# सुन्दरकाण्ड सप्तषष्टितमः सर्गः (६७) - सीता वचन अनुवाद

एवमुक्तस्तु हनुमान् राघवेण महात्मना ।
सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥

इद मुक्तवती देवी जानकी पुरुषर्षभ ।
पूर्व वृत्त मभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥

सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ।
वायसः सहसोत्पत्य विददार स्तनान्तरे ॥ ३ ॥

पर्यायेण च सुप्तस् त्वं देव्यङ्के भरताग्रज ।
पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥

पुनः पुनरुपागम्य विरराद भृशं किल ।
ततस्त्वं बोधितस् तस्याः शोणितेन समुक्षितः ॥ ५ ॥

वायसेन च तेनैव सततं बाध्य मानया ।
बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ ६ ॥

तां तु दृष्ट्वा महाबाहो दारितां च स्तनान्तरे ।
आशीविष इव क्रुद्धो निःश्वसन् नभ्य भाषथाः ॥ ७ ॥

नखाग्रैः केन ते भीरु दारितं तु स्तनान्तरम् ।
कः क्रीडति सरोषेण पञ्च वक्त्रेण भोगिना ॥ ८ ॥

निरीक्षमाणः सहसा वायसं सम वैक्षथाः ।
नखैः सरुधिरैस् तीक्ष्णैस् तामेवाभि मुखं स्थितम् ॥ ९ ॥

सुतः किल स शक्रस्य वायसः पततां वरः ।
धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १० ॥

ततस् तस्मिन् महाबाहो कोप संवर्ति तेक्षणः ।
वायसे त्वं कृथाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥

स दर्भं संस्तराद् गृह्य ब्रह्मास्त्रेण ह्ययो जयः ।
स दीप्त इव कालाग्निर् जज्वालाभि मुखः खगम् ॥ १२ ॥

क्षिप्तवांस्  त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति ।
ततस्तु वायसं दीप्तः स दर्भोऽनु जगाम ह ॥ १३ ॥

स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः ।
त्रीँल्लोकान् सम्परिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥

पुनरेवागस् त्रस्तस् त्वत् सकाश मरिन्दम ।
स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ १५ ॥

वधार्हमपि काकुत्स्थ कृपया पर्य पालयः ।
मोघमस्त्रं न शक्यं तु कर्तु मित्येव राघव ॥ १६ ॥

भवांस् तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ।
राम त्वां स नमस्कृत्य राज्ञे दशरथाय च ॥ १७ ॥

विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् ।
एवमस्त्रविदां श्रेष्ठः सत्त्ववान् शीलवानपि ॥ १८ ॥

किमर्थ मस्त्रं रक्षःसु न योजयति राघवः ।
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ १९ ॥

न च सर्वे रणे शक्ता रामं प्रति समासितुम् ।
तस्य वीर्यवतः कश्चिद् यद्यस्ति मयि सम्भ्रमः ॥ २० ॥

क्षिप्रं सुनिशितैर् बाणैर् हन्यतां युधि रावणः ।
भ्रातु रादेश माज्ञाय लक्ष्मणो वा परन्तपः ॥ २१ ॥

स किमर्थं नरवरो न मां रक्षति राघवः ।
शक्तौ तौ पुरुष व्याघ्रौ वाय्वग्नि समतेजसौ ॥ २२ ॥

सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ।
ममैव दुष्कृतं किञ्चिन् महदस्ति न संशयः ॥ २३ ॥

समर्थौ सहितौ यन्मां नावेक्षेते परन्तपौ ।
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ २४ ॥

पुनरप्यह मार्यां तामिदं वचन मब्रवम् ।
त्वच्छोक विमुखो रामो देवि सत्येन ते शपे ॥ २५ ॥

रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ।
कथञ्चिद् भवती दृष्टा न कालः परिशोचितुम् ॥ २६ ॥

इमं मुहूर्तं दुःखाना मन्तं द्रक्ष्यसि भामिनि ।
तावुभौ नर शार्दूलौ राजपुत्रा वनिन्दितौ ॥ २७ ॥

त्वद् दर्शन कृतोत् साहौ लङ्कां भस्मी करिष्यतः ।
हत्वा च समरे रौद्रं रावणं सहबान्धवम् ॥ २८ ॥

राघवस्त्वां वरारोहे स्वां पुरीं नयते ध्रुवम् ।
यत्तु रामो विजानीया दभिज्ञान मनिन्दिते ॥ २९ ॥

प्रीति सञ्जननं तस्य प्रदातुं त्वमिहार्हसि ।
साभिवीक्ष्य दिशः सर्वा वेण्युद् ग्रथन मुत्तमम् ॥ ३० ॥

मुक्त्वा वस्त्राद् ददौ मह्यं मणिमेतं महाबल ।
प्रतिगृह्य मणिं दिव्यं तव हेतो रघूद्वह ॥ ३१ ॥

शिरसा तां प्रणम्यार्या मह मागमने त्वरे ।
गमने च कृतोत्साह मवेक्ष्य वर वर्णिनी ॥ ३२ ॥

विवर्धमानं च हि मा मुवाच जनकात्मजा ।
अश्रु पूर्ण मुखी दीना बाष्प संदिग्ध भाषिणी ॥ ३३ ॥

ममोत्पतन सम्भ्रान्ता शोक वेग समाहता ।
हनुमन् सिह सङ्काशा वुभौ तौ रामलक्ष्मणौ ।
सुग्रीवं च सहामात्यं सर्वान् ब्रूया ह्यनामयम् ॥ ३४ ॥

यथा च स महाबाहुर् मां तारयति राघवः ।
अस्माद् दुःखाम्बु संरोधात् त्वं समाधातु मर्हसि ॥ ३५ ॥

इमं च तीव्रं मम शोक वेगं
रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरि प्रवीर ॥ ३६ ॥

एतत् तवार्या नृप राज सिंह
सीता वचः प्राह विषाद पूर्वम् ।
एतच्च बुद्ध्वा गदितं मया त्वं
श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥